एतेषां कर्षकैर्भागैर्घृतप्रस्थं विपाचयेत् ।
शतावरीरसं क्षीरं घृतस्येदं चतुर्गुणम् ॥
संपिबेन्नियतं नारी नित्यं स्त्रीषु च शस्यते ।
पुत्रान् जनयते नारी मेधाढ्यान् प्रियदर्शनान् ॥
या चैवास्थिरगर्भा स्यात् या नारी जनयेत् मृतम् ।
अल्पायुषञ्च जनयेत् या च कन्याः प्रसूयते ॥
योनिदोषे रजोदोषे गर्भस्रावे च शस्यते ।
प्रजावर्द्धनमायुष्यं सर्व्वग्रहनिवारणम् ॥
नाम्ना फलघृतं ह्येतदायुष्यं परिकीर्त्तितम् ।
नोक्तञ्च लक्ष्मणामूलं वदन्त्यत्र चिकित्सकाः ॥
जीववत्सा एकवर्णा घृतमत्र तु दीयते ।
आरण्यगोमयेनात्र वह्निर्ज्वाला प्रदीयते" ।
अत्र पयस्या क्षीरयुक्तभूमिकुष्माण्डम् । उत्पलं ।
नीलं । इतीन्द्रजाले मृतवत्साचिकित्सा ॥ * ॥
अथ गर्भस्रावचिकित्सा । प्रथमे मासि ।
"गोक्षीरैः पेषयेत्तुल्यं पद्मकेशरचन्दनम् ।
पतने तं पिबेन्नारी महागर्भः स्थिरो भवेत् ॥
अथवा मधुकं दारु शरवृक्षस्य वीजकम् ।
संपिष्य क्षीरकाकोलीं पिबेत् क्षीरैश्च गोभवैः ॥१॥
नीलोत्पलं मृणालञ्च षष्ठी कर्कटशृङ्गिका ।
गोक्षीरेश्च द्वितीये च पीत्वा शाम्यति वेदना ॥२॥
श्रीखण्डं तगरं कुष्ठं मृणालं पद्मकेशरम् ।
पिबेत् शीतोदकैः पिष्ट्वा तृतीये वेदनावती ॥
अथवा क्षीरकाकोलीबलानन्तापयः पिबेत् ॥३॥
शीतोत्पलं मृणालानि गोक्षीरक-कशेरुकम् ।
तुर्य्यमासे गवां क्षीरं पिबेत् सा वेदनापरा ॥
अथवा मधुकं रास्ना श्यामा ब्राह्मणयष्टिका ।
अनन्ता पेषयित्वा तु गवां क्षीरैः समं पिबेत् ॥४॥
पुनर्णवा च काकोली तगरं नीलमुत्पलम् ।
गोक्षीरं पञ्चमे मासि गर्भक्लेशहरं भवेत् ॥
अथवा वृहतीयुग्मं पद्माक्षं कट्फलं त्वचः ।
गोघृतं क्षीरसंयुक्तं पिबेत् पिष्ट्वा च पञ्चमे ॥ ५ ॥
सिता काशाश्मभञ्जा च शीततोयेन पेषयेत् ।
षष्ठे मासि गवां क्षीरैः पिबेत् क्लेशं निवर्त्तयेत् ॥
अथवा गोक्षुरं प्रियुं मधुकं पृश्निपर्णिकाम् ।
बलायुक्तां पिबेत् पिष्ट्वा गोदुग्धैः षष्ठमासके ॥६॥
काण्डकं पौष्करं मूलं शृङ्गाटं नीलमुत्पलम् ।
पिष्ट्वा च सप्तमे मासि क्षीरैः पीत्वा प्रशाम्यति ॥
अथवा मकरन्दाढ्यां शृङ्गाटञ्च सकेशरम् ।
मृणालं शर्करायुक्तं क्षीरैः पेयन्तु सप्तमे ॥ ७ ॥
यष्टी पद्माक्षार्कमुस्तं केशरं गजपिप्पली ।
नीलोत्पलं गवां क्षीरैः पिबेदष्टममासके ॥
अथवा विल्वमूलञ्च कपित्थं वृहती शमी ।
इक्षुपाटलयोर्मूलं एभिः क्षीरं प्रसाधयेत् ।
तत्क्षीरमष्टमे पीत्वा गर्भे शाम्यति वेदना ॥८॥
विशालावीजकक्वाथं मधुना सह लेपयेत् ।
वेदना नवमे मासि शान्तिमाप्नोति नान्यथा ॥
अथवा मधुकं श्यामा ह्यनन्ता क्षीरकाकली ।
एभिः सिद्धं पिबेत् क्षीरं नवमे वेदनावती ॥९॥
शर्करा गोस्तनी द्राक्षा सक्षुद्रं नीलमुत्पलम् ।
पाययेत् दशमे मासि गवां क्षीरैः प्रशान्तये ॥
अथवा शुद्धसंसिद्धं गोक्षीरं दशमे पिबेत् ।
अथवा मधुकं दारु शुद्धक्षीरेण संपिबेत् ॥१०॥
क्षौद्रं वृषं चन्दनसिन्धुजातं
महेन्द्रराजं पयसा सुपिष्टम् ।
गर्भं क्षरन्तं प्रतिहन्ति शीघ्रं
योगो विमुञ्चन् किल मूलदेवैः" ॥
इति इन्द्रजाले गर्भस्रावचिकित्सा ॥ * ॥
अथ गर्भशुष्कम् ।
"गोक्षीरं शर्करायुक्तं गर्भशुष्कप्रशान्तये ।
पिबेद्वा मधुकं चूर्णं गाम्भारीफलचूर्णकम् ॥
समांसं गव्यदुग्धेन गर्भिणी च प्रशान्तये" ॥*॥
अथ सुखप्रसवयोगः ।
"श्वेतं पुनर्णवामूलं चूर्णं योनौ प्रवेशयेत् ।
तत्क्षणात् प्रसूते नारी गर्भे सति प्रपीड़िते ॥
वासकस्य तु मूलन्तु चोत्तरस्थं समुद्धरेत् ।
कट्यां बद्धा सप्तसूत्रैः सुखं नारी प्रसूयते ॥
सहदेव्याश्च मूलं वा कटिस्थं प्रसवेत् सुखम् ।
अपामार्गस्य मूलन्तु ग्राहयेच्चतुरङ्गुलम् ॥
द्वारि प्रवेशयेत् योनौ तत्क्षणात् सा प्रसूयते" ॥*॥
अथ स्तनवर्द्धनं स्तनोत्थापनञ्च ।
"तैलं वचादाड़िमकल्कसिद्धं
सिद्धार्थजं लेपनतो नितान्तम् ।
नारीकुचौ चारुतरौ सुपीनौ
कुर्य्यादसौ योगवरः प्रदिष्टः ॥
श्रीपर्णिकाया रसवल्कसिद्धं
तिलोद्भवं तैलवरं प्रदिष्टम् ।
तुलेन वक्षोजयुगे प्रदेयं
प्रयाति वृद्धिं पतितोऽपि नार्य्याः ॥
प्रथमकुसुमकाले नस्ययोगेन पीतं
सनियममजरास्यं तण्डुलाम्भो युवत्याः ।
कुचयुगलमुपीनं क्वापि नो याति पातं
कथित इति पुरैव चक्रदत्तेन योगः" ॥*॥
अथ योनिसंस्कारः ।
"प्रक्षालयेन्निम्बकषायनीरैः
स्निग्धान्यक्लृप्यागुरुगुग्गुलानां ।
धूपेन योनिं निशि धूपयित्वा
नारी प्रमोदं विदधातु भर्त्तुः" ॥ * ॥
अथ लोमशातनम् ।
"पलाशभस्मान्विततालचूर्णै-
रम्भाम्बुमिश्रैः परिलिप्य भूयः ।
कन्दर्पगेहे मृगलोचनानां
रोमाणि रोहन्ति कदापि नैव" ॥
इति इन्द्रजालतन्त्रसंग्रहः ॥ युद्धे छद्मोपायविशेषः ।
इति हेमचन्द्रः ॥

इन्द्रजालिकः, त्रि, (इन्द्रजालं करोति इन्द्रजालेन दीव्यतीति वा । इन्द्रजाल + ठक् ।) कुहककारी । इति जटाधरः ॥ वाजीकर इति भाषा ।

इन्द्रजित्, पुं, (इन्द्रं जितवान् इति । इन्द्र + जि + क्विप् ।) रावणपुत्रः । तत्पर्य्यायः । मेघनादः २ मन्दोदरीसुतः ३ । इति जटाधरः ॥ (अस्य जन्मविवरणं यथा, रामायणे ७।१२। सर्गे,
"एवमुक्तस्तदा राम ! राक्षसेन्द्रेण दानवः ।
महर्षेस्तनयं ज्ञात्वा मयो दानवपुङ्गवः ॥
दातुं दुहितरं तस्मै रोचयामास तत्र वै ॥ १६ ॥
करेण तु करं तस्या ग्राहयित्वा मयस्तदा ।
प्रहसन् प्राह दैत्येन्द्रो राक्षसेन्द्रमिदं वचः ॥ १७ ॥
इयं ममात्मजा राजन् हेमयाप्सरसा धृता ।
कन्या मन्दोदरी नाम पत्न्यर्थं प्रतिगृह्यताम् ॥१८॥
वाढ़मित्येव तं राम ! दशग्रीवोऽभ्यभाषत ।
प्रज्वाल्य तत्र चैवाग्निमकरोत् पाणिसङ्ग्रहम्" ॥१९॥
"ततो मन्दोदरी पुत्त्रं मेघनादमजीजनत् ।
स एष इन्द्रजिन्नाम युष्माभिरभिधीयते ॥ २८ ॥
जातमात्रेण हि पुरा तेन रावणसूनुना ।
रुदता सुमहान् मुक्तो नादो जलधरोपमः ॥२९॥
जड़ीकृता च सा लङ्का तस्य नादेन राघव ! ।
पिता तस्याकरोत् नाम मेघनाद इति स्वयम्" ॥३०॥
अस्य यथा इन्द्रजिदित्यभिधानं जातं तदपि उक्तं तत्रैव ३५ सर्गे ।
"जिते महेन्द्रेऽतिबले रावणस्य सुतेन वै ।
प्रजापतिं पुरस्कृत्य ययुर्लङ्कां सुरास्तदा ॥ १ ॥
तत्र रावणमासाद्य पुत्त्रभ्रातृभिरावृतम् ।
अब्रवीद् गगने तिष्ठन् सामपूर्व्वं प्रजापतिः ॥ २ ॥
वत्स रावण ! तुष्टोऽस्मि पुत्त्रस्य तव संयुगे ।
अहोऽस्य विक्रमौदार्य्यं तव तुल्योऽधिकोऽपि वा ॥३॥
जितं हि भवता सर्व्वं त्रैलोक्यं स्वेन तेजसा ।
कृता प्रतिज्ञा सफला प्रीतोऽस्मि ससुतस्य ते ॥४॥
अयञ्च पुत्त्रोऽतिबलस्तव रावण वीर्य्यवान् ।
जगतीन्द्रजिदित्येव परिख्यातो भविष्यति ॥ ५ ॥
बलवान् दुर्जयश्चैव भविष्यत्येव राक्षसः ।
यं समाश्रित्य ते राजन् स्थापितास्त्रिदशा वशे" ॥६॥
महावीरो लक्ष्मणस्तु विभीषणेन वानरादिभिश्च-सह निकुम्भिलां गत्वा तत्रस्थमेनमिन्द्रजितं व्यापादयामास इति तत्रैव लङ्काकाण्डे ५ सर्ग-मारभ्य ७ सर्गेषु उक्तम् ॥
स्वनामख्यातो दानवः । यथा हरिवंशे । ३ । ८३ ।
"इन्द्रजित् सत्यजिच्चैव वज्रनाभस्तथैव च ।
महानाभश्च विक्रान्तः कालनाभस्तथैव च" ॥)

इन्द्रजिद्विजयी, [न्] पुं, (इन्द्रजितः रावणपुत्त्रस्य । विजयी इति । इन्द्रजित् + वि + जि + णिनि ।) लक्ष्मणः । इति शब्दरत्नावली ॥ (अस्य विवरणन्तु रामायणे । ६ । ९१ सर्गे उक्तम् । यथा,—
"इत्युक्त्वा बाणमाकर्णं विकृष्य तमजिह्मगम् ।
लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति ॥ ७२ ॥
ऐन्द्रास्त्रेण समायोज्य लक्ष्मणः परवीरहा ।
तच्छिरः सशिरस्त्राणं श्रीमत् ज्वलितकुण्डलम् ।
प्रमथ्येन्द्रजितः कायात् पातयामास भूतले" । ९३ ।)

इन्द्रतूलं, क्ली, (इन्द्रस्य तूलं । आकाशे उड्डीयमानत्वात् ।) आकाशपतितसूत्रम् । आकाशबुड़िर सुता इति भाषा । तत्पर्य्यायः । वृद्धसूत्रकम् २ पौष्पहासम् ३ वंशकफम् ४ वाततूलम् ५ मरुद्ध्वजम् ६ । इति हारावली ॥

इन्द्रतूलकं, क्ली, (इन्द्रतूलमेव । इन्द्रतूल + स्वार्थे कन् ।) इन्द्रतूलं । इति त्रिकाण्डशेषः ॥

इन्द्रदारुः, पुं, (इन्द्रस्य दारुः ।) देवदारुवृक्षः । इति भावप्रकाशः ॥ (अस्य पर्य्यायः ।